उपशास्त्री-I साहित्य

काव्यदीपिका

प्र०-(1) - ध्वनेर्भेदौ वर्णनीयः ?

उत्तरम् - भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाऽभिधामूलौ।
अविवक्षितवाच्यो विवक्षितान्यपरवाच्यकश्च ॥
लक्षणामूलः अभिधामूलश्चेति ध्वनेर्द्वौ भेदौ।
तौ च क्रमेण अविवक्षितवाच्यः विवक्षितान्यपरवाच्यश्चेति नामद्वयेनापि व्यपदिश्येते।
तत्र अविवक्षितं - बाधितस्वरूपं वाच्यं यत्र स: अविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः,
लक्षणामूलत्वादेवात्र वाच्यमविवक्षितम्।

प्र०-(2) - विवक्षितान्यपरवाच्यस्य किं स्वरूपम् ?

उत्तरम् - विवक्षितञ्चान्यपरं वाच्यं यत्रापरस्तु सः।
यत्र वाच्यं विवक्षितं - प्रकाशितरूपं सत् अन्यपरं - व्यङ्ग्यनिष्ठं सोऽपरः - विवक्षितान्यपरवाच्यो ध्वनिः। यत्र हि वाच्योऽर्थः स्वरूपं प्रकाशयन्नेव व्यङ्ग्यार्थस्य प्रकाशकः।
यथा - प्रदीपो घटस्य।

Renu Devi
06/06/21

राधा उमाकान्त सं० महावि० सुरवसेना
पूर्णिया।

शास्त्री II खण्ड साहित्य

रघुवंश - चतुर्दशःसर्गः

Saathi

Date ___/___/___

प्र०(1)- आनन्दजः शोकजमश्रु बाष्पस्तयोरशीतं शिशिरो बिभेद ।
गङ्गासरय्वोर्जलमुष्णतप्तं हिमाद्रिनिस्यन्द इवावतीर्णः ॥

उत्तरम्- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य चतुर्दशसर्गात् उद्धृतोऽस्ति । अस्मिन् श्लोके श्रीरामः स्वरूपवर्णनं करोति ।

व्याख्या- तयो = मात्रोः कौशल्यासुमित्रयोः। आनन्दजः = हर्षोत्पन्नः अत एव शिशिरः = शीतलः। बाष्प = अश्रु। शोकजं = शोकोत्पन्नम। अत एव अशीतम् = उष्णम्। अश्रु बाष्पं उष्णतप्तं = ग्रीष्म तप्तं। गङ्गासरय्वोः = भागीरथीसरयूनद्योः। जलं = तोयम्। अवतीर्णः = प्रविष्टः। हिमाद्रिनिस्यन्द इव = हिमालयनिर्झर इव। बिभेद = विददार ।

भावार्थः- यथा वर्षतौ हिमालयस्य शीतलः प्रवाहो ग्रीष्म-सन्तप्तं गङ्गासरयूजलं प्रविश्य शीतलयति, तथैव कौशल्यासुमित्रयोः श्रीराम लक्ष्मणाभ्यसहर्षोत्पन्नं शीतलमश्रुजलं पतिनिधनशोकोत्पन्नमुष्णाश्रुजलं शीतलं चकारेति भावः।

Renu Devi
06/06/21
राधा उमाकान्त सं० महावि० सुखसेना
पूर्णिया ।

Page No. ____

उपशास्त्री - II साहित्य
काव्यदीपिका

प्र० (1) - नान्द्याः किं लक्षणम् ?

उत्तरम् → नन्दयति आनन्दयति यस्यां सा नान्दी। देवद्विजनृप-गुर्वादीनाम् आशीर्वादयुक्ता स्तुतिर्गुणकीर्तनं यस्मात् प्रवर्तते - सामाजिकस्य नटैः प्रयुज्यते तद्वचनमेव नान्दीति कथ्यते। नन्दयति देवादीन् सामाजिकान् कुशीलवांश्च या सा नान्दी।

प्र० - (2) - आमुखस्य किं लक्षणम् ?

उत्तरम् →
नटी विदूषको वापि पारिपार्श्विक एव वा।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा ॥

प्रस्तुतं दृश्यकाव्यं सूचयन्तीति तैस्तथोक्तैर्विचित्रैर्वाक्यैः परस्परं सम्भाषणं कुर्वते तत्तु आमुखं विज्ञेयम्। मुखे प्रारम्भे विधेयत्वादपि आमुखमिति ज्ञेयम्।

प्र० - (3) - अङ्कावतारस्य किं स्वरूपम् ?

उत्तरम् - यस्य कस्याचिदङ्कस्य अन्ते पात्रैस्तदङ्काभिन्नत्वेन कथ्यते। यथा - अभिज्ञानशाकुन्तल नाटके पञ्चमाङ्के पात्रैः सूचितः षष्ठोऽङ्कः तदङ्कस्याङ्कविशेष इवावतीर्णः।

Renu Devi
06/06/21
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

शास्त्री-I साहित्य
अभिज्ञानशाकुन्तलम्

प्र० (1) अभिज्ञानशाकुन्तलम् नाटकस्य कथानकम् प्रदर्शितम्।
उत्तरम् → कथानकम् — अभिज्ञानशाकुन्तलस्य कथानकमितिहास-प्रसिद्धं महाभारत गृहीतमस्ति। यद्यपि दुर्वाससः शापादिकं मूलकथानके नास्ति तथापि यथा चित्रकारो रेखां कृत्वा पश्चाद् रङ्गैः रञ्जयति चित्रं तु हृदयं करोति तथैव कविरपि इतिहास प्रसिद्धं कथानकमादय रसरङ्गैः रञ्जयित्वा सहृदयहृदयास्वाद्यं करोति काव्यम्। कथावस्तुदृष्ट्या अभिज्ञानशाकुन्तलं नाटकमतीवोदात्तमस्ति।

प्र० (2) नायकस्य किम् स्वरुपम् ?
उत्तरम् → प्रख्यातवंशो राजर्षिः धीरोदात्तः प्रतापवान्।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः॥
इति नाट्यशास्त्रीयवचनानुसारं नाटकस्य नायकेन प्रख्यात-वंशीयेन, राजर्षिणा, धीरोदात्तगुणान्वितेन, दिव्येनाऽदिव्येन दिव्यादिव्येन वा भवितव्यम्। अभिज्ञानशाकुन्तलस्य नायको दुष्यन्तोऽस्ति यः खलु प्रख्याते पुरुकुले उत्पन्नोऽस्ति 'जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।' इति तथा च राजर्षिरस्ति, यथा कण्वशिष्यः कथयति- पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः। इति।
अभिज्ञानशाकुन्तलस्य नायको दुष्यन्तो धीरोदात्तोऽस्ति।
महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः॥
धीरोदात्तनायकस्य सर्वे गुणास्तत्र यथावद् दृश्यन्ते।
एवं च नायकदृष्ट्याऽपि नाटकमिदं प्रशस्यतरमस्ति॥

Renu Devi
06/06/21

राधा उमाकान्त सं० महावि० सुरसेना
पूर्णिया।